दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

himsanskritvartah
e-Sanskritnewspaper
नवा प्रेरणा नवोत्साहः

■ पृष्ठ-4 ■ वर्ष-3 ■ अङ्क-100

1 02.02.2024 शुक्रवासरः वि.सं. २०८० माघकृष्ण अष्टमी माघ १८ प्रविष्टांशः
Website- www.himsanskritam.com Email-himsanskrit@gmail.com


हिमाचले हिमपातः, २४१ मार्गाः ६७७ विद्युत्परावर्तकाः च अवरुद्धाः, 2



प्रभासस्य ६००-कोटिरूप्यकस्य चलचित्रम् 'कल्कि २८९८ ई.' 3



मनुष्यजीवनस्य माधुर्यम् ओ३म् मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः। माध्वीर्नः सन्त्वोषधीः।। 4



## अथ आकाशवाणी वार्ताः

संकलनकर्ता-नरेश मलोटिया

### संसदः उभयोः सत्रयोः स्थगनम्

अंशकालिक-वित्त-संकल्पना-प्रपत्रस्य प्रस्तुतान्तरं संसदः उभे सदने आदिनं यावत् स्थगिते जाते। लोसभासदने वित्तमन्त्रिणा द्विसहस्रतमवर्षस्य चतुर्विंशति-पञ्चविंशति-वर्षाभ्यां प्रशासनस्य अनुमानितयोः प्राप्तव्ययोः प्रतिवेदनं प्रस्तुतम्। वित्तविधेयकं चतुर्विशत्युत्तरद्विसहस्रतमम् अपि लोकसभायां प्रस्तुतम् आसीत् तदनन्तरं सदनस्य कार्याचरणम् आदिनं स्थगितं जातम् आसीत्। राज्यसभायां वित्तमन्त्रिणा अंशकालिक-वित्त-संकल्पना- प्रपत्रस्य एका प्रतिः सदनस्य पटले स्थापिता। तदनु सदनस्य कार्याचरणं सम्पूर्णदिवसाय स्थगितं जातम्।

### इदं अंशकालिक-वित्त-संकल्पना पत्रं विंशतिः सप्तचत्वारिंशत् वर्षं यावत् प्रधानमन्त्रिणः नरेन्द्र मोदिनः विकसित-भारतस्य दृष्टिकोणं प्राप्तुं मार्गदर्शनं करोति- केन्द्रीयगृहमन्त्री अमितशाहः

केन्द्रीय गृहमन्त्रिणा अमित शाहेन गतदिने अंशकालिक-वित्त-संकल्पना-पत्रस्य प्रशंसा कुर्वता प्रोक्तं यत् इदं विंशतिः सप्तचत्वारिंशत् वर्षं यावत् प्रधानमन्त्रिणः नरेन्द्र मोदिनः विकसित-भारतस्य दृष्टिकोणं प्राप्तुं मार्गदर्शनं करोति श्रीशाहेनोक्तं यत् वित्तसंकल्पनापत्रम् अमृतकाले भारतं प्रत्येकस्मिन् क्षेत्रे अग्रगण्य-राष्ट्र निर्मातुं मार्गमपि प्रदर्शयति। रक्षामन्त्रिणा राजनाथसिंहेन अपि अंशकालिक-वित्त-संकल्पना-पत्रस्य प्रशंसा कुर्वता उत्साहर्धकमिदं वित्त संकल्पना-पत्रं इति उक्तम्। रक्षामन्त्रिणा विश्वासः प्रकटितः यत् देशः सप्त- चत्वारिंशदधिक-द्विसहस्रवर्षं यावत् निश्चयेन विकसितराष्ट्रं भविष्यति। केन्द्रीयमन्त्रिणा किरेण-रिजिजू इत्यनेन उक्तं यत् इदं वित्त-संकल्पना-पत्रं भारतं अग्रे नेतुं एकं आदर्शमाध्यममस्ति। तेनोक्तं यत् अनेन आधारभूत संरचना-कृषि-सामाजिक - नीलार्थव्यवस्थाः समेत्य सर्वेषु क्षेत्रेषु ध्यानं प्रदत्तमस्ति। केन्द्रीयमन्त्रिणा नितिन गडकरिणा उक्तं यत् इदं वित्त-संकल्पना-पत्रं भारतीय वित्तीय क्षेत्रं सुदृढीकरिष्यति।

## नवीन- ऋण-योजनान्तर्गतम् अधुना सप्त-लक्ष-रुप्यकात्मकेभ्यः आययुतेभ्यः करदातृभ्यः ऋण-प्रदानं नैव भविष्यति- वित्तसंकल्पना-पत्रम् 2024



वित्तमन्त्रिणा निर्मला सीतारमण इत्यनया गुरुवासरे संसदि अस्य वर्षस्य अंशकालिकं वित्त-संकल्पना-पत्रं प्रस्तुतम्। प्रत्यक्ष-परोक्ष-कर-मूल्ययोः परिवर्तनस्य प्रस्तावः नैव पारितः। वित्तमन्त्रिणा निगदितं यत् आयातशुल्कं समेत्य प्रत्यक्ष-स्थापयितुं निर्णयः गृहीतः। नवीन-ऋण-योजनान्तर्गतम् अधुना सप्त-लक्ष-रुप्यकात्मकेभ्यः आययुतेभ्यः करदातृभ्यः ऋण-प्रदानं नैव भविष्यति यत् त्रयोदशाधिक-द्विसहस्रतमवर्षस्य वित्तीय वर्षे द्वे-दशमलव-द्वे-लक्ष- रुप्यकात्मकम् आसीत्। अल्पविक्रय-व्यवसायेभ्यः ऋणाधानस्य सीमा साम्प्रतं द्विकोटितः सम्वर्ध्य त्रिकोटिमितं यावत् कृता । एवमेव व्यावसायिक योग्येभ्यः पात्रेभ्यः अनुमानितं ऋणाधानं पञ्चाशल्लक्षरुप्यकेभ्यः संवर्ध्य पञ्सप्ततिलक्षरुप्यकाणि यावत् कृतम्। वित्तमन्त्रिणा नवाचारेण सम्प्रभु-धन-कोषेण च निवृत्ति-कोषेण च विहिते निवेशे ऋण- लाभस्य केषुचित् आई-एफ.एस. सी. इत्येतस्य एकाङ्क्षानां केषुचित् च आयेषु पञ्चविंशत्यधिक-द्विसस्रतमवर्षस्य मार्चमासस्य एकत्रिंशदिनांकं यावत् ऋण-मुक्तेः प्रस्तावः स्थापितः। वित्तमन्त्रिणा कथितं यत् प्रशासनं संसदि अर्थव्यवस्थायां श्वेतपत्रं स्थापयिष्यति। अनया अभिव्यक्तं यत् चतुर्दशाधिक-द्विसहस्रतमवर्षात् पूर्व-वर्षाणां सङ्कटः दूरीकृतः।

वित्तमन्त्रिणा कथितं यत् प्रशासनस्य योजना प्रचल्यमाणानां चिकित्सालयानां संरचनागत-सौविध्यानाम् उपयोगं कृत्वा अनेकेषां चिकित्सकीय महाविद्यालयानाम् उद्घाटनमस्ति। अनया योजना सम्बद्धानां प्रसङ्गानां समीक्षायै एकाः समितिः स्थापयिष्यते। श्रीमति-सीतारमण् इत्येसा कथितवती यत् प्रशासनं सर्वाइकल इत्याख्यस्य कर्करोगं रोद्धु नववर्षतः चतुर्दशायुपर्यन्तं बालिकाभ्यः सूच्यौषधिकरणस्य घोषणां विहितवत्। मातृणां शिशूनाञ्च- उपचारार्थं विभिन्नाः योजनाः व्यापकीय-सामञ्जस्याय एकस्य कार्यक्रमस्य अन्तर्गतम् आनेतव्याः। अनया समुदीरितं यत् साम्प्रतिके समये उद्घोषिता भारत-मध्यम-पूर्व-यूरोपीय- आर्थिक-बीथीः भारताय अन्येभ्यः च एकः संरचनागत-आर्थिक परिवर्तनकारि-पदक्षेपो वर्तते।

## केन्द्रीय बजट 2024 : केन्द्रस्य अन्तरिम-आयव्ययकं राज्यस्य जनानाम् आकांक्षां पूरयितुं असफलम्- मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः




हिमसंस्कृतवार्ताः- शिमला। मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः अवदत् यत् केन्द्रसर्वकारस्य अन्तरिम-आयव्ययकं प्रदेशवासिनां हिमाचलस्य च अपेक्षां पूरयितुम् असफलं जातम्। एतत् बजटं राज्यस्य जनान् निराशं कृतवान्। पूर्वबजटस्य पुनरावृत्तिः इति उक्त्वा सः अवदत् यत् वित्तमन्त्रीद्वारा प्रस्तुते अन्तरिमबजटभाषणे किमपि नवीनं न उक्तम्। मुख्यमन्त्री उक्तवान् यत् गतमानसूनतौं हिमाचले या प्राकृतिक-आपदा अभवत्, ततः परं राज्यस्य जनाः केन्द्रसर्वकारात् विशेष-आर्थिक-संकुलस्य अपेक्षां कुर्वन्ति स्म, परन्तु तस्मिन् तस्य कोऽपि उल्लेखः नास्ति। सः अवदत् यत् रेलजालस्य विस्तारं दृष्ट्या हिमाचलस्य कुत्रापि उल्लेखः न कृतः। सः अवदत् यत् स्थायिविकासाय हरित ऊर्जा, सौर ऊर्जा च उल्लिखिता अस्ति किन्तु तस्य सम्बोधने तस्य स्पष्टमार्गचित्रस्य उल्लेखः नास्ति। भारतीय अर्थव्यवस्थायां मध्यमवर्गस्य महत्त्वपूर्णा भूमिका अस्ति चेदपि मध्यमवर्गाय अतिरिक्तं कर-आश्रयं न दत्तम्। सः अवदत् यत् एलपीजी इत्यस्य मूल्यानि वर्धितानि, सामान्यजनानां कृते डीजलस्य, पेट्रोलस्य च मूल्येषु न्यूनता न अभवत्। सः अवदत् यत् अस्मिन् बजटे निर्धनानाम् मध्यमवर्गस्य च कृते आश्रयं दातुं स्थाने केवलं पूंजीपतयः उद्योगिनः च मनसि स्थापिताः सन्ति। मुख्यमन्त्री उक्तवान् यत् मालसेवाकरसंग्रहणे १.८ लक्षकोटिरूप्यकाणि यावत् अभवत् अपि आयकरादिकरेषु अतिरिक्तम् अपकर्षं न दत्तम्। हिमाचलसदृशानां पर्वतीयराज्यानां कृते यत्र मेट्रोरेलमार्गः आरब्धुं न शक्यते तत्र द्रुतगतिसामान्ययानव्यवस्थायाः अपि उल्लेखः नास्ति। एतदतिरिक्तं स्वास्थ्यक्षेत्रे अपि नूतनस्य उपक्रमस्य उल्लेखः न कृतः।

## प्रमुखाः वार्ताः

### भारत-संयुक्त अरब अमीरात देशयोः मध्ये द्विपक्षीय-निवेश-सन्धिपत्रे हस्ताक्षराय अनुमतिः



केन्द्रीय-मन्त्रिमण्डलेन भारत-संयुक्त अरब अमीरात देशयोः मध्ये द्विपक्षीय-निवेश- सन्धिपत्रे हस्ताक्षराय संपुष्टिकरणाय च अनुमतिः प्रदत्ता। अनेन सन्धिपत्रेण निवेशकाणां विशिष्टतया बृहद्-निवेशकाणां च विश्वासः वर्धिष्यते। येन फलस्वरूपेण वैदेशिक-निवेशे वृद्धिः भविष्यति। सहैव विदेश-प्रत्यक्ष-निवेशकाणां लब्धावसरेषु परिवर्तनं भविष्यति। वृत्यवसराः सृजिताः भविष्यन्ति।

### भारत-इंग्लैंड-दलयोर्मध्ये द्वितीया प्रतिस्पर्धा अद्य विशाखापत्तने

पुरुषाणां क्रिकेट् - निकष-प्रतिस्पर्धायां भारत-इंग्लैंड-दलयोर्मध्ये द्वितीया प्रतिस्पर्धा अद्य विशाखापत्तने भविष्यति। हैदराबादस्य राजीवगान्धी-अन्ताराष्ट्रियक्रीडाङ्गणे प्रथमे द्वन्द्वे इग्लैडदलेन भारतं अष्टविंशतिः धावनंकैः पराजयित्वा पञ्चात्मिकीयां क्रीडाश्रृङ्खलायां इग्लैण्ड दलं एकं-शून्यं इति अङ्कान्तरालेन अग्रे अस्ति

### सुभाषितम्

यावद्वित्तोपार्जनसक्तः
तावन्निजपरिवारो रक्तः।
पश्चाज्जीवति जर्जरदेहे वार्तां
कोऽपि न पृच्छति गेहे॥

भावार्थ- जब तक व्यक्ति धनोपार्जन में समर्थ है, तब तक परिवार में सभी उसके प्रति स्नेह प्रदर्शित करते हैं परन्तु अशक्त हो जाने पर उसे सामान्य बातचीत में भी नहीं पूछा जाता है।

*प्रतीकसाठ्ये मुम्बई*


सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम् प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः- १७७१११

# हिमाचले हिमपातः, २४१ मार्गाः ६७७ विद्युत्परावर्तकाः च अवरुद्धाः, मुख्यमन्त्री पदातिः कांग्रेसमुख्यालयं प्राप्तवान्





हिमसंस्कृतवार्ताः। हिमाचलप्रदेशे नारङ्गवर्णीयसचेतनायाः मध्ये तृतीयदिनं यावत् वर्षा, हिमपातः च निरन्तरं वर्तते। राज्यस्य उच्चोच्चक्षेत्राणि हिमेन आच्छादितानि सन्ति। यत्र अन्येषु क्षेत्रेषु वर्षा ज्ञाता अस्ति। हिमाचलप्रदेशस्य राजधान्यां शिमलानगरे अस्य ऋतोः नूतनवर्षस्य च प्रथमः हिमपातः अभवत्। ऐतिहासिके रिजस्थले एवं मालरोडे उपस्थिताः पर्यटकाः हिमपुटस्य पतनं दृष्ट्वा रोमाञ्चिताः अभवन्। चम्बा-जनपदस्य खज्जियारे ऋतोः प्रथमः हिमपातः अभवत्। मण्डलस्य चुराह, भरमौरं, पाङ्गी, डल्हौजी इत्यत्र हिमपातः निरन्तरं वर्तते। आदिवासीक्षेत्रं पाङ्गी अन्येभ्यः भागेभ्यः कटितम् अस्ति। अधिकांशेषु पंचायतेषु विद्युत् आपूर्तिः स्थगिता अस्ति।

वर्षा-हिमपात-कारणात् राज्ये गुरुवासरे प्रातः १०:०० वादनपर्यन्तं षट् राष्ट्रियराजमार्गाः २४१ मार्गाः च यातायातस्य कृते अवरुद्धा अभवन्। राज्ये ६७७ विद्युत् परिवर्तकाः अपि स्थगिताः सन्ति। लाहौल-स्पीतौ अधिकतमं १३९ मार्गाः अवरुद्धाः सन्ति। किन्नौरे २०, कुल्लौ ११, मण्ड्यां १४, शिमलायां १३ मार्गाः निरुद्धाः सन्ति। लाहौल उपत्यका हिमेन आवृता अस्ति। अत्र तृतीयदिनं यावत् हिमपातः निरन्तरं भवति। अटलकन्दरायाः दक्षिणद्वारे द्विपादाधिकं हिमपातस्य कारणेन लाहौल-उपत्यका देशात् विश्वात् च विच्छिन्ना अस्ति।

## डोभी, कटराईतः अग्रे वाहनानां गमनागमनं स्थगितम्

प्रचण्डहिमपातस्य कारणात् डोभी, कटराईतः परं मनालीं प्रति वाहनानां प्रवेशः न भवति। वातावरणं मनसि कृत्वा यात्रां कर्तुं पुलिसैः परामर्शः दत्तः। कस्यापि आपत्कालीन-स्थितौ कुल्लूपुलिसेन सहायतारेखा संख्या (हेल्पलाइन नंबर) 8219681600 इत्यत्र संपर्कं साधयितुं कथितमस्ति।

राज्यस्य हिमयुक्तेषु क्षेत्रेषु एकदर्जनाधिकाः सर्वकारीयनिजीबसयानानि च निरुद्धानि सन्ति। कुल्लु- लाहौल-स्पीति-जनपदयोः हिमपातवृष्ट्या च सामान्यजीवनं प्रभावितम् अस्ति। ऊर्ध्वभागाः हिमेन आवृताः सन्ति। प्रचण्डहिमपातस्य कारणात् कुल्लुतः मनालीपर्यन्तं गच्छतां बससेवानां प्रभावः अपि भवति। हिमपातवृष्ट्या राजमार्गाः, मार्गाः च अवरुद्धाः भवन्ति इति कारणतः कुल्लूनगरस्य विद्यालयेषु २ फरवरीपर्यन्तं अवकाशः घोषितः। अस्मिन् विषये जिलाप्रशासनेन आदेशाः निर्गताः सन्ति। अटलकन्दरारोहताङ्गद्वारा मनाली-केलाङ्ग-राष्ट्रियराजमार्गसहिताः बहवः मार्गाः हिमपातस्य कारणेन बाधिताः अभवन्।

कुल्लूमण्डलात् लाहौलं संपर्करहितम् अस्ति। यत्र बहुषु ग्रामेषु विद्युत् अपि विफलतां प्राप्नोत्। हिमपातेन जीवनं प्रभावितम् अस्ति। वर्षाकारणात् मनालीं प्रति बसयानानि अपि प्रभावितानि सन्ति। पत्लीकुहलतः परं मनाली प्रति गच्छतां बसयानानां प्रेषणं न क्रियते। तेन सह ग्राम्यक्षेत्रेषु बसयानानां चक्राणां स्थगनेन जनानां समस्याः वर्धिताः सन्ति। तस्मिन् एव काले गुरुवासरे प्रातः मनालीनगरे वर्षाऋतुः आरब्धः अस्ति। वर्षाकारणात् मार्गाः प्लाविताः अभवन्। कुल्लुनगरे अपि वर्षा अभवत्। नालिकानां सम्यक् जलनिकासी न भवति इति कारणेन जनाः समस्यानां सम्मुखीकरणं कुर्वन्ति। वर्षा- हिमपात-कारणात् कुल्लु-लाहौल-उपत्यका च तीव्रशीत-परिग्रहे वर्तते।

## निरुद्धाः राष्ट्रियराजमार्गाः

रामपुरम्- शिमला
मनाली- लेहम्
आनी- कुल्लुः
ग्रांफु- काजा
चम्बा- भरमौरम्




## स्थानीयजनानां पर्यटकानां च कृते महत्त्वपूर्णः परामर्शः

> मौसमसम्बद्धं यत्किमपि यातायातपरामर्शं निर्गतं तत् अनुसरणं कुर्वन्तु।

> सम्बन्धितविभागैः निर्गतपरामर्शानां मार्गदर्शिकानां च अनुसरणं कुर्वन्तु।

> गन्तव्यस्थानं प्रति गमनात् पूर्वं स्वमार्गे यातायातस्य निरीक्षणं कुर्वन्तु।

> हिमपातसंवेदनशीलक्षेत्रेषु न गच्छन्तु।

> न्यूनतापमानस्य कारणात् पशून् अन्तः एव स्थापयन्तु, तेषां स्थापनार्थं पर्याप्तं व्यवस्थां कुर्वन्तु।

## मुख्यमन्त्री सुक्खुः ओकोवरतः पदातिः काङ्ग्रेस- मुख्यालयं प्राप्तवान्



शिमलानगरे नवीनहिमपातस्य अनन्तरं मुख्यमन्त्री स्वस्य आधिकारिकनिवासस्थानात् ओकोवरतः पदातिः राजीवभवनं (काङ्ग्रेसमुख्यालयं) प्राप्तवान्। अत्र सः काङ्ग्रेसपक्षस्य राष्ट्रियकार्यकारीसभायां भागं गृहीतवान्। तेन सह अनेके मन्त्रिणः, मुख्यसंसदीयसचिवाः (सीपीएस), विधायकाः, दलकार्यकर्तारः च उपस्थिताः आसन्।

# टाण्डाचिकित्सामहाविद्यालये (TMC) सफला जाता प्रथमा पूर्णा अन्तःदर्शनशल्यक्रिया






हिमसंस्कृतवार्ताः- कार्यालयीयः प्रतिनिधिः।

डॉ. राजेन्द्रप्रसाद- राजकीय- चिकित्सा महाविद्यालये, टाण्डा इत्यस्य न्यूरोसर्जरीविभागे प्रथमा सम्पूर्णा अन्तःदर्शनशल्यक्रिया (एंडोस्कोपिक डिस्क सर्जरी) सफला जाता। चम्बाजनपदस्य ५० वर्षीयः पुरुषः गत एकमासाद् स्खलितचक्रसमस्यया पीडितः आसीत्, गमने अपि महान्तं कष्टं प्राप्नोति स्म सः टाण्डा-चिकित्सालयस्य न्यूरोसर्जरीविभागस्य विशेषज्ञं न्यूरोसर्जनं डॉ. मुकेशकुमारं स्वसमस्यायाः विषये सूचितवान्। रोगिणः निरीक्षणं कृत्वा न्यूरोसर्जन डॉ. मुकेशकुमारः तस्मै शल्यक्रियायाः परामर्शं दत्तवान्। सोमवासरे एन्डोस्कोपिक, द्विनेत्री, लेजर स्पाइन डिस्क रिमूवल सर्जरी सहितम् एकल सीवनेन सहितं तस्य पृष्ठभागस्य सम्पूर्णा शल्यक्रिया न्यूरोसर्जन डॉ. मुकेशकुमारेण तस्य दलेन च च सफलतया कृतम्।

सफलशल्यक्रियायाः अनन्तरं रोगी सर्वथा कुशलः अभवत्। बुधवासरे एव सायंकाले २ दिवसान् यावत् वेदनारहितस्थितौ सः मुक्तः अभवत्। हिमाचले एषा एव सुविधा अस्ति। टाण्डाचिकित्सामहाविद्यालये प्रथमवारं एतादृशी चिकित्सा आरब्धा अस्ति।

अस्य चिकित्साविज्ञानस्य प्रवर्तनेन राज्यस्य जनानां लाभः अवश्यमेव भविष्यति, रोगिणां कृते आशायाः संजीवनी अपि भविष्यति। टाण्डाचिकित्सामहाविद्यालयस्य प्राचार्यः डॉ. भानु अवस्थी सफलशल्यक्रियायै अभिनन्दितवान्।

## किमस्ति पूर्ण-अन्तर्दर्शनीय/ लेजर मेरुदण्डस्य शल्यक्रिया ?

इदं न्यूनतम- आक्रामक- मेरुदण्डस्य (MIS) शल्यक्रियायाः उन्नतरूपम् अस्ति यत्र १ से.मी.तः न्यूनं लघुव्रणं कृत्वा अन्तःदर्शनं प्रविष्टं भवति। उच्च-सटीकतायाः आवर्धनस्य च अधीनं स्खलितं चक्रं निष्कासितम् अस्ति रेडियो आवृत्ति-अन्वेषकाः लोकप्रियतया लेजर इति नाम्ना प्रसिद्धाः उपयुज्यन्ते।





**ध्यातव्यं वर्तते यत् बुधवासरे हिमाचलराजकीयसंस्कृतशिक्षकपरिषदः प्रतिनिधिमण्डलं जिलाध्यक्षस्य डॉ.अमनदीपशर्मणा महासचिवस्य पुनीतशर्मणा च नेतृत्वे बोर्डसचिवेन धर्मशालायां मिलितवान्, यत्र पारस्परिकवार्तायां सचिवेन संशोधनविषये सूचना प्रदत्ता।**

# हिमाचलशिक्षाबोर्डस्य परीक्षासमयसारिण्यां परिवर्तनम्; २ मार्चतः २१ मार्चपर्यन्तं दशमीकक्षायाः परीक्षाः, २८ मार्च पर्यन्तं द्वादशी कक्षायाः परीक्षाः

हिमसंस्कृतवार्ताः। हिमाचलप्रदेशविद्यालयशिक्षाबोर्ड पक्षतः 2023-24 तमस्य वर्षस्य शैक्षणिकसत्रस्य दशमीद्वादशी कक्षयोः नियमित-मुक्तविद्यालयस्य परीक्षासमयसारिण्यां संशोधनं कृतम्। अस्य दत्तांशपत्रस्य माध्यमेन दशम-द्वादश-वर्गस्य वार्षिकपरीक्षाः, विभागः, श्रेणीसुधारः, अतिरिक्तविषयपरीक्षाः समाविष्टाः सन्ति। बोर्डेन प्रकाशितस्य तिथिपत्रानुसारं दशमकक्षायाः परीक्षाः मार्चमासस्य ०२ दिनांकात् २१ मार्चपर्यन्तं भविष्यन्ति। एतदतिरिक्तं द्वादशी कक्षायाः परीक्षा मार्चमासस्य प्रथमतः २८ मार्चपर्यन्तं भविष्यति , तत्रैव द्वयोः वर्गयोः परीक्षा प्रातः ८.४५ वादनतः मध्याह्न १२ पर्यन्तं भविष्यति। लिखितपरीक्षाभ्यः पूर्वं व्यावहारिकपरीक्षाः बोर्डेन क्रियन्ते, या 21 फरवरीतः 29 फेब्रुवरीपर्यन्तं भविष्यति, यस्य समयसूची बोर्डेन पूर्वमेव प्रकाशिता अस्ति। अपरपक्षे हिमाचलप्रदेशविद्यालयशिक्षामण्डलस्य सचिवः डॉ. मेजरविशालशर्मा इत्यनेन उक्तं यत् दशमी द्वादशी कक्षयोः संशोधितं तिथिपत्रं बोर्डेन प्रकाशितम् अस्ति।

# मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः पारिस्थितिकीसन्तुलनं स्थापयितुम् आर्द्रभूमिसंरक्षणस्य आह्वानं कृतवान्



**हिमसंस्कृतवार्ताः-शिमला।**
गुरुवासरे विश्व आर्द्रभूमिदिवसस्य अवसरे मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः जलवायुपरिवर्तनस्य प्रभावं दृष्ट्वा पारिस्थितिकसन्तुलनं स्थापयितुम् आर्द्रभूमिसंरक्षणस्य आह्वानम् अकरोत्। एतस्य सन्तुलनस्य निर्वाहार्थं एतेषां आर्द्रभूमिक्षेत्राणां महती भूमिका अस्ति। हिमाचले स्थितानां रामसरस्थलानान् अन्येषां च आर्द्रभूमिक्षेत्राणां संरक्षणे सक्रियरूपेण सहकार्यं कर्तुं राज्यस्य जनान् अपि आग्रहं कृतवान्। अस्मिन् वर्षे विश्व आर्द्रभूमिदिवसस्य विषयः 'आर्द्रभूमिः मानवकल्याणं च' इति स्थापितः अस्ति। इरानदेशस्य रामसरनगरे १९७१ तमे वर्षे फरवरीमासस्य २ दिनाङ्के आयोजिते आर्द्रभूमि-महत्व- सम्मेलने हस्ताक्षरितस्य रामसर-अभिसन्धेः स्मरणार्थं १९९७ तमात् वर्षात् अयं दिवसः आयोजितः अस्ति। आर्द्रभूमिः समाजाय पर्यावरणसन्तुलनं प्रददाति। एतेषु नवजलं जलात् हानिकारकम् अपशिष्टं परिष्कृत्य पानार्थं शुद्धं करोति। तेन सह अयं खाद्यपदार्थानाम् उत्तमः स्रोतः इति अपि प्रसिद्धः अस्ति। अत्यन्तम् ऋतोः घटनासु अत्यधिकम् अपवाहः, अनावृष्टिः इत्यादीनाम् आशंकानां न्यूनीकरणे अपि आर्द्रभूमिः भूमिकां निर्वहति। आर्द्रभूमिक्षेत्राणि न केवलं जैवविविधतायाः संरक्षणं कुर्वन्ति अपितु असंख्यजनानाम् आजीविकायाः स्रोतः अपि भवन्ति। मुख्यमन्त्री उक्तवान् यत् राज्ये रामसरस्थलानां संरक्षणाय राज्यसर्वकारसहितं स्थानीयसमुदायस्य भूमिका अतीव महत्त्वपूर्णा अस्ति। सः अवदत् यत् हिमाचले विभिन्नपारिस्थितिकीक्षेत्रेषु विस्तृताः विविधाः आर्द्रभूमिः अस्ति। स्थानीयजनानाम् आजीविकायाः पूर्तये अतिरिक्तं प्राकृतिकसौन्दर्यस्य पर्यटनस्य च दृष्ट्या अपि इदं क्षेत्रं महत्वपूर्णम् अस्ति।
हिमाचलप्रदेशविज्ञानप्रौद्योगिकीपर्यावरणपरिषदः प्रवक्ता अवदत् यत् राज्यस्य आर्द्रभूमिप्राधिकरणेन वनं, शिक्षा, पर्यटनं, मत्स्यविभागः एवं जिला प्रशासनम् इत्येतेषां सहयोगेन विश्वार्द्रभूमिदिवसस्य अवसरे गोबिन्दसागरसरोवरः, पोङ्गजलबन्धः, रेणुकाआर्द्रभूमि सहितं विभिन्नस्थानेषु कार्यक्रमाणाम् आयोजनं क्रियते।
मण्डीजनपदस्य रिवालसर इत्यत्र राज्यस्तरीयं कार्यम् आयोज्यते यस्मिन् छात्रसहिताः विविधाः अराजकीयसंस्थाः अपि भागं गृह्णन्ति। अस्मिन् काले सप्ताहव्यापी स्वच्छता- जागरुकता- अभियानानाम् अतिरिक्तं पंचायत-विद्यालयस्तरयोः अपि एतेषां स्थानानां महत्त्वम् आधारीकृत्य चित्रकला- प्रतियोगितानां, संवाद-व्याख्यानानां च आयोजनं भविष्यति।
सम्प्रति राज्ये स्थितं पोङ्गजलबन्धं, रेणुका, चन्द्रतालसरोवरं च अन्तर्राष्ट्रीयमहत्वयुक्तेषु रामसरस्थलेषु समाविष्टम् अस्ति। एतदतिरिक्तं केन्द्रीय- पर्यावरणवनजलवायुपरिवर्तनमन्त्रालयेन रिवालसरं खज्जियारसरोवरं च राष्ट्रियमहत्वस्य आर्द्रभूमिरूपेण समावेशितम् अस्ति। सुक्खुः उक्तवान् यत् राज्यसर्वकारः एतेषां स्थलानां संरक्षणाय, प्रचाराय च प्रभावी पदानि गृह्णाति। अस्यां दिशि हिमाचलप्रदेश आर्द्रभूमिप्राधिकरणद्वारा विविधाः क्रियाकलापाः आयोजिताः सन्ति। आर्द्रभूमिसम्बद्धनियमानां संरक्षणं, प्रबन्धनं, संरक्षणम्, अनुपालनं च सुनिश्चित्य जिलास्तरीयाः आर्द्रभूमिसमितयः अपि निर्मिताः सन्ति। छात्राः इको-क्लब-माध्यमेन तया सह सम्बद्धाः सन्ति, समुदायस्तरस्य आर्द्रभूमि- संरक्षण- अभियानानां माध्यमेन तेषां विषये जागरुकता च उत्पाद्यते।

# केन्द्रीय बजट-2024 : सांसद इन्दुगोस्वामी केन्द्रीय- आयव्ययकस्य प्रशंसाम् अकरोत्, उक्तं च एतेन राज्यस्य सर्वतोमुखी विकासः भविष्यति



**हिमसंस्कृतवार्ताः- कार्यालयीयः प्रतिनिधिः।**
राज्यसभा सांसद इन्दु गोस्वामी वित्तमन्त्री निर्मलासीतारमणद्वारा प्रस्तुतस्य आय-व्ययकस्य प्रशंसाम् अकरोत्। इन्दुगोस्वामी इत्यनया उक्तं यत् एतत् केन्द्रीयबजटं हिमाचलप्रदेशे पर्यटनं, दुग्ध- मत्स्य- उद्योगं च इत्येतेभ्यः प्रवर्धनं दास्यति। सा अवदत् यत् एतत् बजटं प्रसिद्धानां पर्यटनस्थलानां आधारभूतसंरचनात्मकविकासे राज्यसर्वकाराणां सहायतां करिष्यति। तेषां ब्राण्डिंग-विपणनयोः केन्द्रसर्वकारस्य सहभागितया धर्मशाला, पालमपुरं, डलहौजी, शिमला, मनाली इत्यादिषु हिमाचलप्रदेशस्य अनेकपर्यटनस्थलेषु अन्ताराष्ट्रीयपर्यटकानाम् आकर्षणे सहायकः भविष्यति। स्थानीययुवकानां कृते रोजगारस्य अवसराश्चापि प्राप्यन्ते। एतेन पर्यटन-उद्योगाय पक्षाः प्राप्यन्ते येन हिमाचलसदृशस्य पर्वतीयराज्यस्य सर्वतोमुख-विकासः वर्धते।
सा अवदत् यत् केन्द्रसर्वकारस्य विमानयानस्य सुदृढीकरणस्य निर्णयेन राज्ये उच्चस्तरीयानाम् अन्ताराष्ट्रीयपर्यटकानाम् आगमनं वर्धते, येन राज्यस्य आर्थिकदशा सुदृढा भविष्यति। पर्यटनक्षेत्रे आधारभूतसंरचनाविकासाय राज्यसर्वकारेभ्यः व्याजमुक्तऋणसुविधां प्रदातुं शिमला, मनाली, धर्मशाला, डलहौजी इत्यादीनां बहूनां पर्यटनस्थलानां कृते मार्गं, पेयजलं, विद्युत, पार्किङ्ग इत्यादीनां योजनानां दीर्घकालं यावत् लम्बितानां योजनानां व्यवस्थापनं सम्पन्नं कर्तुं शक्यते, येन स्थानीयजनानाम् सहायता भविष्यति। जनाः अपि लाभं प्राप्नुयुः। राज्यसभा सांसद इन्दु गोस्वामी इत्यनया उक्तं यत् आयुष्मानभारतयोजनायाः अन्तर्गतं सर्वान् आंगनबाडीकार्यकर्तयः, सहायकान् आशाकार्यकर्तयः च आच्छादयित्वा हिमाचलप्रदेशस्य सहस्रशः महिलाः प्रत्यक्षतया लाभं प्राप्नुयुः, तेषां चिकित्सायाः कृते ताः कस्यचित् उपरि निर्भरं न भविष्यति। सा अवदत् यत् छदौ सौर ऊर्जायाः सदुपयोगस्य योजना राज्यस्य दुर्गमानाम्, पश्चात्तापानां, ग्रामीणक्षेत्राणां कृते विशेषलाभं करिष्यति। अस्याः योजनायाः माध्यमेन प्रत्येकं गृहे प्रतिमासं ३०० यूनिट निःशुल्कविद्युत् प्राप्स्यति, येन धनस्य रक्षणं भविष्यति एकतः अपरतः च राज्यसर्वकारेण एषा ऊर्जा बृहत् उद्योगेभ्यः प्रदातुं शक्यते येन राज्ये औद्योगिकीकरणस्य मार्गः प्रशस्तः भविष्यति। एतेन प्रतिपरिवारं प्रायः १८,००० रुप्यकाणां वार्षिकं रक्षणं भविष्यति इति सा अवदत्।

**चलचित्रवार्ताः** हिमसंस्कृतवार्ताः

# प्रभासस्य ६००-कोटिरूप्यकस्य चलचित्रम् 'कल्कि २८९८ ई.'




**हिमसंस्कृतवार्ताः- जगदीश डाभी, मुम्बई।**
दक्षिणस्य सफलाभिनेता-प्रभासः सम्प्रति 'सालार' इति चलचित्रस्य कारणेन वार्तायां वर्तते। प्रभासस्य एतत् चलचित्रं गतवर्षस्य दिसम्बरमासे प्रदर्शितम् अभवत्। प्रशंसकानां कृते अस्य चलचित्रस्य प्रचण्डः प्रेम्णः प्राप्तः अस्ति। प्रशंसाः अपि अभवन्। अस्य चलचित्रस्य प्रचण्डं अर्जनम् अपि अभवत्। ७०० कोटिरुप्यकाधिकम् अर्जनं कृत्वा एतत् चलचित्रं सफल-चलचित्रं जातम्। 'सालार' चलचित्रस्य सफलता पश्चाद् प्रभासः शीघ्रमेव 'कल्कि २८९८ ई.' इत्यस्मिन् चलचित्रे दृश्यते। अस्मिन् चलचित्रे प्रभासः सह दीपिका पादुकोणः, अमिताभ बच्चनः, कमल हासनः, दिशा पटानी इत्यपि दृश्यन्ते। भवन्तः एतत् ज्ञात्वा आश्चर्यचकिताः भविष्यन्ति यत् प्रभासस्य 'सालार' इत्यस्य चलचित्रेण यदा ७०० कोटिरुप्यकाधिकम् अर्जनं जातम्, तदा प्रभासस्य चलचित्रस्य 'कल्कि २८९८ ई.' इत्यस्य बजटं केवलं ६०० कोटिरुप्यकाणि एव अस्ति। 'कल्कि २८९८ ई.' चलचित्रं ६०० कोटिरुप्यकाणां बृहत् बजटेन निर्मितम् अस्ति। प्राप्तवार्तानुसारम् अस्मिन् चलचित्रे कमल हासन दिग्गजः अभिनेता खलनायकस्य भूमिकायां दर्शनं दास्यति। चलचित्रे 'नायकः' इत्यस्य इव खलनायकः अपि अतीव शक्तिशालिनः भवति।

# सुधाशक्तिदुग्धं, दधि, तक्रं च अद्यारभ्य महत्

## मूल्ये भविष्यति, भारेण सह, मूल्यम् अपि न्यूनीकृतम् अधुना ज्ञातव्यं यत् एकलीटरस्य दुग्धस्य मूल्यम्

**हिमसंस्कृतवार्ताः- कुणाल कौशिकः, मोतिहारी**
बिहारस्य लोकप्रियः डेयरी ब्राण्डसंस्था सुधाशक्तिः पुनः दुग्धस्य मूल्यवर्धनस्य निर्णयं कृतवती। सुधा शक्ति दुग्धं अधुना ५४ रुप्यकाणां स्थाने ५५ रुप्यकेषु प्रतिलीटरं प्राप्यते। दुग्ध-ब्राण्ड-संस्थायाः दधि- तक्रम् इत्यनयोः भारं मूल्यं च न्यूनीकर्तुं निर्णयः कृतः। मूल्ये परिवर्तनं २०२४ तमस्य वर्षस्य फरवरीमासस्य प्रथमदिनात् आरभ्य कार्यान्वितम् अस्ति। सूचनानुसारं सुधाशक्तिदुग्धस्य मूल्यं १ रुप्यकेण वर्धितम् अस्ति। अधुना सुधाशक्तिदुग्धस्य मूल्यं ५४ रुप्यकाणां स्थाने ५५ रुप्यकाणि प्रतिलीटरं यावत् वर्धितम् अस्ति। लस्सी इत्यस्य भारः मूल्यं च न्यूनीकृतम् अस्ति। साधारणं तक्रम् इदानीं १५० मिलिलीटरस्य स्थाने १४० मि. ली., अस्य मूल्यं द्वौ रुप्यकौ न्यूनीकृतम् अस्ति। सुधा सामान्य तक्रं १२ रुप्यकाणां स्थाने १० रुप्यकेषु उपलभ्यते।
८० ग्रामभारस्य कुहरे दधिः अधुना १२ रुप्यकाणां स्थाने १० रुप्यकेषु उपलभ्यते। अधुना एव सुधा दुग्धशालायाः दुग्धं २४ अप्रैलतः प्रतिलीटरद्वयं चत्वारि रुप्यकाणि महत्तरं जातम् आसीत्। अस्मिन् सूत्रे पुनः महङ्गानि योजितानि सन्ति। पूर्वं विक्रेता एकं किलो घृतं विक्रीय ३० रुप्यकाणां रक्षणं करोति स्म, परन्तु अधुना ४५ रुप्यकाणां रक्षणं भविष्यति। सुधा घी पोली पैक साचेट इत्यस्य मूल्यं प्रतिलीटरं ६३० रुप्यकम् अस्ति। ५०० मिलिलीटर घृतस्य मूल्यं ३१५ रुप्यकाणि निर्धारितम् अस्ति।

# बिहारे अपराधिनां समूहः आतङ्कं जनयति, शाकविक्रेतारं प्रातः काले गोलिका मारिता


हिमसंस्कृतवार्ताः- कुणाल कौशिकः, मोतिहारी बिहारे शक्तिः परिवर्तिता अस्ति। नीतीशकुमारः अधुना एनडीए-सहकारेण राज्ये नूतनं सर्वकारं निर्मितवान्। परन्तु राज्ये यदि किमपि परिवर्तनं न जातम् तर्हि अपराधिनां रक्तरंजितक्रीडा एव। अपराधिनः अद्यापि भयं विना अपराधघटनानि कुर्वन्ति। नवीनतमः प्रकरणः राजधानी पटनातः अस्ति। यत्र अपराधिनः प्रातःकाले महती घटनां कृतवन्तः। सूचनानुसारम् अपराधिनः दिवा प्रकाशे एकं जनं गोलिकाभिः मारितवन्तः। तदनन्तरं आहतस्य चिकित्सायै सः चिकित्सालयं प्रेषितः। यत्र तस्य चिकित्सा क्रियते। वस्तुतः मेहदीगञ्ज पुलिसस्थानक्षेत्रस्य लौहकुण्डस्य समीपे एव विषयः अस्ति। शाकविक्रयणं कुर्वन् गोपाल महतो नामकः जनः अपराधिभिः गोलिकाभिः मारितः इति कथ्यते। सम्प्रति घटनायाः विषये यत् प्रकाशं आगच्छति तत् अस्ति यत् गोपाल महतो प्रातःकाले शाकविक्रयणार्थं मार्गे गृहात् बहिः आगतः एव अपराधिनः ये अपराधिनः पूर्वमेव घातपातं कृतवन्तः। ते गोपालमहतोः दृष्ट्या एव घटनायाः अनन्तरं गोलिकाभिः गोलिकाभिः मारितवन्तः अपराधिनः अतीव सहजतया पलायिताः, स्वपिस्तौलानि क्षोभयन्। घटनायाः अनन्तरं घातितः गोपाल महतोः एनएमसीएच-नगरं नीतः परन्तु स्थितिः गम्भीरताम् अवलोक्य सः पीएमसीएच- इत्यत्र प्रेषितः अस्ति। सम्प्रति पुलिस स्थानं प्राप्य अस्य विषयस्य अन्वेषणं कुर्वन् अस्ति। एतत् ज्ञातुं प्रयतते यत् एते अपराधिनः के आसन् ये एतत् घटनां कृतवन्तः। परन्तु पुलिस अस्मिन् विषये किमपि वक्तुं नकारयति।

# ।। श्रीरामायणकथा ।।

## लङ्काकाण्डम्! (द्विषष्टितमः सर्गः) पुष्पकविमानेन श्रीरामचन्द्रस्य अयोध्यायात्रा, भरद्वाजगुहादिभिः सह च साक्षात्कारः(सप्तमः खण्डः)

नगरवसिनः सर्वे रामं द्रष्टुं नन्दिग्रामं प्रति आगच्छन्ति इति समीक्ष्य भरतः हनुमन्तं वाक्यम् अब्रवीत् हे सौम्य! त्वं मां वितथं तु न वदसि खलु? अहं तु परन्तपं रामं न पश्यामि। भरतेन एवमुक्ते वचने हनुमान् अब्रवीत् हे सत्यपराक्रम! भरद्वाजप्रसादेन मत्तभ्रमरनादितान् सदाफलान् कुसुमितान् मधुस्रवान् वृक्षान् पश्य! हे परन्तप! एषः वरः तेन मुनिना भरद्वाजेन राघवाय दत्तः। इदानी ससैन्यस्य रामस्य आतिथ्यं महामुनिः भरद्वाजः करोति। पुनः हनुमान् भरतम् अब्रवीत् हे परन्तप! शृणु! प्रहृष्टानां वानराणां भीमः निःस्वनः श्रूयते। मन्ये सा वानरसेना गोमती नदी तरति। पश्य! तत् चन्द्रसन्निभं ब्रह्मनिर्मितं पुष्पकविमानं दूरात् दृश्यते। महात्मना राघवेण बान्धवैः सार्धं रावणं हत्वा लब्धम् एतत् तरुणादित्यसङ्काशां विमानम् इदानी तस्यैव वाहनम्। एतस्मिन् विमाने वैदेह्या सह भ्रातरौ रामलक्ष्मणौ, महातेजाः सुग्रीवः, राक्षसराजः विभीषणः च सन्ति।

अत्रान्तरे हि स्त्रीबालयुववृद्धानां रामोऽयम् इति हर्षसमुद्भूतः निःस्वनः आकाशम् अस्पृशत्। तदानीं ते अश्वरथगजेभ्यः अवतीर्य गगने वासववत् विमानस्थं रामं अपश्यन्। ततः प्राञ्जलिः प्रहृष्टः भरतः राघवोन्मुखः भूत्वा यथार्थेन पाद्यार्घ्यैः रामम् अपूजयत्। ततः रामेण अनुज्ञातं हंसयुक्तं महावेगं तदुत्तमं विमानं महीतले अपतत्।



तदा सत्यविक्रमः भरतः तद् विमानम् आरुह्य रामम् आसाद्य मुदितः अभवत्। रामः भरतं चिरात् दृष्ट्वा अत्यन्तं मुदितः सन् तं समुत्थाप्य आलिङ्ग्य अङ्के आरोपयत्। ततः प्रीतः भरतः वैदेह्याः समीपं गत्वा स्वनाम उक्त्वा तस्याः अभिवादनम् अकरोत्। लक्ष्मणः तदा अग्रजस्य भरतस्य अभिवादनम् अकरोत्। ततः भरतः विमाने उपविष्टानां सुग्रीव- जाम्बवान्- अङ्गद- मैन्द- द्विविद- नील- ऋषभ- सुषेण- नल- गवाक्ष- गन्धमादन- शरभ- पनसानाम् अभिवादनम् अकरोत्। ततः धर्मिणां वरः भरतः सुग्रीवम् अब्रवीत् हे सुग्रीव! सौहृदात् मित्रं जायते, अपकारस्तु शत्रुलक्षणम्। त्वम् अस्माकं चतुर्णां भ्रातॄणां पञ्चमः भ्राता। पुनः भरतः विभीषणम् अब्रवीत् हे राक्षसेश्वर! दिष्ट्या त्वया सहायेन मम भ्रात्रा सुदुष्करं कर्म कृतम्। तदा शत्रुघ्नः सलक्ष्मणं रामम् अभिवाद्य सीतायाः चरणौ स्पृष्ट्वा तां प्राणमत्।

ततः श्रीरामः विवर्णां शोककर्शितां मातरं कौशल्याम् आसाद्य सुमित्रां यशस्विनी कैकेयी च अभिवाद्य ताभिः मातृभिः सह पुरोहितभवनम् अगच्छत्। रामस्य पुरोहितभवनं प्रति गमनसमये प्राञ्जलयः पौराः सर्वे हे महाबाहो कौशल्यानन्दवर्द्धन! तव स्वागतमस्ति इति रामम् अब्रुवन्। तदानी भरतः स्वयं रामस्य पादुके गृहीत्वा नरेन्द्रस्य रामस्य पादाभ्यां योजयित्वा रामं वाक्यम् अब्रवीत् यया एतत् सकलं राज्यं मह्यं दत्तम् अद्य अहं तत् सकलं राज्यं तुभ्यं समर्पयामि। अद्य त्वाम् अयोध्यां पुनरागतं राजानं दृष्ट्वा मम जन्म कृतार्थं मनोरथश्च संवृत्तः अभूत्। हे राजन्! राज्यस्य कोशं कोष्ठागारं बलं गृहं च पश्य। तव तेजसा एतत् सर्वं मया दशगुणं कृतम्। तथा ब्रुवाणं तं भ्रातृवत्सलं भरतं दृष्ट्वा राक्षसः विभीषणः वानराश्च सर्वे वाष्पम् अमुञ्चन्। ततः प्रहर्षात् रामः भरतम् अङ्के आरोप्य ससैन्यः तेन विमानेन भरताश्रमम् अगच्छत्।

भरताश्रमं प्राप्य ससैन्यः रामः तस्मात् विमानात् अवतीर्य तद् उत्तमं विमानम् अब्रवीत् - अहं त्वाम् आज्ञापयामि, इतः त्वं देवं वैश्रवणं गच्छ। रामेण अनुज्ञातं राक्षसेन संगृहीतं तत् पुष्पकं दिव्यं विमानमुत्तमम् उत्तरां दिशम् उद्दिश्य धनदालयम् अगच्छत्। ततः देवराजः इन्द्रः देवगुरोः वृहस्पतेः इव राघवः पुरोहितस्य वसिष्ठस्य पादौ निपीड्य प्रणम्य तेन सहैव एकस्मिन् उत्तमे आसने उपाविशत्।



हिमसंस्कृतवार्ता, ✍प्रदीपः
pradipnath997@gmail.com

# मनुष्यजीवनस्य माधुर्यम्

## ओ३म् मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः। माध्वीर्नः सन्त्वोषधीः।। मधु नक्तमुतोषसो मधुमत् पार्थिवं रजः। मधु द्यौरस्तु नः पिता।। मधुमान्नो वनस्पतिर्मधुमां अस्तु सूर्यः। माध्वीर्गावो भवन्तु नः।।



अर्थात्, यस्य सर्वाण्यपि कार्याणि सत्यान्वितानि भवेयुः, सः 'ऋतायन्' कथ्यते। तस्य सत्यमयस्य पुरुषस्य कृते वायवः मधुवर्षणम् अथवा माधुर्यस्य वर्षणं कुर्वन्ति। अस्माकम् उद्यमिनां कृतेऽपि सस्यौषधादिखाद्यपदार्थाः सदा माधुर्योपेताः भवन्तु।

अस्मत्कृते रात्रिः, प्रातःकालः, धूलिः, जलवर्षणेन अस्माकं पालकः पिता परमेश्वरः, द्युलोकः इत्यादयः सर्वेऽपि मधुमयाः भवन्तु। अस्मत्कृते वनस्पतिः मधुमान् भवतु, कर्मप्रेरकः सूर्यः मधुमान् भवतु, एवं गोमातरः अस्मत्कृते अमृतसमानाः क्षीरप्रदात्र्यः भवन्तु। बाह्यविज्ञानतः मनुष्यः जीवनमाधुर्यं न कदापि प्राप्नुयात्, वास्तविकी शान्तिं च नाधिगच्छेत्। उपनिषदुक्तेन आत्मस्वरूपज्ञानेन हि मनुष्यः शोकमोहादिभ्यः निवृत्तिं प्राप्य शाश्वती शान्तिम् अनुभवति।

**'तरति शोकमात्मवित्'**, 'तत्र को मोहः कः शोक एकत्वमनुपश्यतः', 'ज्ञात्वा शिवं शान्तिमत्यन्तमेति' इत्याद्युपनिषद्वाक्यानि अनुसृत्य शान्तिं प्राप्तवतां महापुरुषाणां मधुमयजीवनम् एतस्य प्रमाणं वर्तते। श्रीभगवान् स्वयं मधुराणां मधुरतमं वर्तते। कश्चन मनुष्यः तस्य मधुरतमस्य आत्मन्येव अन्वेषणं कुर्यात् तर्हि सः अपि स्वयं मधुरमयः हि भवति। अतः मधुरजीवनस्य प्राप्त्यर्थं सततं भगवच्चिन्तनं स्मरणं, ध्यानं, जपः सङ्कीर्तनम् इत्यादीनाम् अवलम्बनम् अत्यन्तम् आवश्यकमस्ति मनुष्यजीवने इति, शम्।

✍असमप्रदेशीयः विज्ञानशिक्षकः, नारदोपाध्यायः

# आत्मानं तत उद्धृत्य परं ब्रह्म प्रपद्यते॥



**नमः श्रीशङ्करानन्दगुरुपादाम्बुजन्मने। सविलासमहामोहग्राहग्रासैककर्मणे॥**

आत्मा पञ्चकोशैः तादात्म्यात् तत्तत् कोशमयः भवतीति अतीतानन्तरश्लोके निरुपितम्। एतादृशस्य आत्मनः कथं ब्रह्मत्वं सम्पाद्यते इत्याशङ्क्या इमं श्लोकमवतारयति भगवान् विद्यारण्यमुनिः,

**अन्वयव्यतिरेकाभ्यां पञ्चकोशविवेकतः। आत्मानं तत उद्धृत्य परं ब्रह्म प्रपद्यते॥**

अन्वयव्यतिरेकाभ्यां पञ्चकोशविवेकेन प्रत्यगभिन्नं ब्रह्म इति साध्यते, इत्येषः अस्य श्लोकार्थः।

आत्मा पञ्चकोशेभ्यः व्यतिरिक्तः इति ज्ञाते, तस्य सच्चिदानन्दरूप-अनतिरिक्तत्वं सम्भवति। यथा, चन्दनागर्वादेः उदकादिसम्बन्धार्द्रीभावादिना जातं क्लेदजं औपाधिकं यत् दौर्गन्ध्यं स्वरूपनिघर्षणेन स्वाभाविकेन स्वेन गन्धेन आच्छाद्यते तथा, अन्वयव्यतिरेकाभ्यां पञ्चकोशविवेकतः औपाधिकं तत्तत्कोशतादात्म्यं निरस्य आत्मनि सच्चिदानन्दरूपत्वं सम्पाद्यते।

कथमात्मा पञ्चकोशेभ्यः भिन्नः इति आकाङ्क्षायाम् एषः अनुमानप्रकारः समुपपद्यते। "यद् व्यावर्तमानेष्वनुवर्तते तत् तेभ्यो भिन्नम्" इति एषः शास्त्रप्रसिद्धः नियमः। तथा हि, "आत्मा पञ्चकोशव्यतिरिक्तः , व्यावर्तमानपञ्चकोशेष्वनुवर्तमानत्वात्, यथा मणिगणेभ्यः सूत्रम्"। एषः हेतुः अन्वयव्यतिरेकाभ्यां साध्यते।

तत्पूर्वम् अन्वयव्यतिरेकयोः लक्षणमुच्यते- तदभावे तत्सत्वम् अन्वयः, तत्सत्वे तदभावः व्यतिरेकः। प्रथमं अन्वयव्यतिरेकाभ्याम् अन्नमयकोशात् स्थूलदेहाद्वा आत्मा भिन्नः इति प्रतिपाद्यते।

स्वप्नावस्थायां स्थूलदेहस्य अभानेऽपि 'अहं घटं पश्यामि', 'अहं कार्यं करोमि' इत्यनेन प्रकारेण अहम्प्रत्ययविषयीभूतस्य आत्मनः ज्ञानम् अनुवर्तते। अतः स्थूलदेहात् भिन्नः आत्मा इति ज्ञायते। एषः आत्मनः अन्वयः। तस्यामेव स्वप्नावस्थायाम् अहम्प्रत्ययविषयीभूतस्य आत्मज्ञानस्य अनुवर्तमानत्वेऽपि अन्नमयकोशः स्थूलदेहः वा नानुवर्तते इत्येषः तस्य व्यतिरेकः।

सुषुप्तिकाले लिङ्गशरीरस्य अभानं वर्तते, तथापि अज्ञानस्य ज्ञानं वर्तते। यतः सुप्तोत्थितः सः 'अहं सुखमस्वाप्सं, न किञ्चिदवेदिषम्' इति वदतीत्यतः सुषुप्तिकालेऽपि अहम्प्रत्ययविषयीभूतस्य आत्मनः अनुवर्तनमासीत् इति गम्यते। यतः या या स्मृतिः सा सा अनुभवपूर्विका। अतः एषः आत्मनः अन्वयः। सुषुप्तिकाले आत्मनः भानेऽपि लिङ्गशरीरस्य अभानात् तत् तस्य व्यतिरेकः।

ननु पञ्चकोशविवेचनमारभ्य लिङ्गशरीरविवेचनं कुर्वन्तः सन्ति। अनेन प्रकरणविरोधः न आगच्छति वा इति चेत् न, "तद्विवेकाद्विविक्ताः स्युः कोशाः प्राणमनोधियः"। लिङ्गशरीरविवेचनेनैव प्राणमय-मनोमय-विज्ञानमयकोशेभ्यः अपि आत्मनः पार्थक्यदर्शनात्। ननु कोशत्रयमपि लिङ्गशरीरेणैव उच्यते चेत् तत्र प्राणादिकोशत्रयेषु अपि अभिन्नत्वं सिद्ध्यति इति चेत् न,। प्राणादिकोशत्रयं लिङ्गशरीरे विद्यमानसत्वरजसः अवस्थाविशेषतः भिद्यते।

समाध्यवस्थायां सुषुप्ति-उपलक्षितस्य कारणशरीरस्य आनन्दमयकोशस्य अभानेऽपि अहमित्याकारकज्ञानस्य अनुवर्तनम् अनुभवात् गम्यते। एषः आत्मनः अन्वयः। समाध्यवस्थायाम् अहमित्याकारकज्ञाने सत्यपि आनन्दमयस्य अभानम् अनुभूयते। एषः तस्य व्यतिरेकः।

एवं यथा व्यावर्तमानेषु मणिगणेषु अनुवर्तमानं सूत्रं व्यावर्तमानेभ्यः मणिगणेभ्यः भिद्यते तथा व्यावर्तमानेषु पञ्चकोशेषु अनुवर्तमानः आत्मा व्यावर्तमानपञ्चकोशेभ्यः भिद्यते इति अनेन सिद्धम्। एवं निष्कल्मषस्य आत्मनः ब्रह्मत्वं निरुपितम्॥

-वासुदेवः आहितानलः, विकिपीडिया